गायत्री-वरिवस्या

'मन्त्र-सङ्केत' मण्डित

महर्षि विश्वामित्र प्रणीत-ब्रह्मतन्त्रोक्त


''गायत्री-स्तवराज''

'गायत्री-विमर्श', सर्ववेदसारभूत गायत्री मन्त्र

तथा

निगमागम सम्मत 'पञ्चकाल-सन्ध्या : एक विश्लेषण'

मूलक शोध-लेख समन्वित



प्रधान-सम्पादक

डॉ० मण्डन मिश्र, प्राचार्य

लेखक एवं सम्पादक

डॉ० रुद्रदेव त्रिपाठी

एम० ए० (संस्कृत-हिन्दी), पी-एच० डी०, डी० लिट्०

श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ

(मानित विश्वविद्यालय)

नई दिल्ली-११००१६

संस्कृतविद्यापीठग्रन्थमालायाः षष्ठपञ्चाशत्तमं पुष्पम्

गायत्री-वरिवस्या

'मन्त्र-सङ्केत' मण्डित

महर्षि विश्वामित्र प्रणीत-ब्रह्मतन्त्रोक्त


''गायत्री-स्तवराज''

'गायत्री-विमर्श', सर्ववेदसारभूत गायत्री मन्त्र

तथा

निगमागम सम्मत 'पञ्चकाल-सन्ध्या : एक विश्लेषण'

मूलक शोध-लेख समन्वित



प्रधान-सम्पादक
डॉ० मण्डन मिश्र, प्राचार्य

लेखक एवं सम्पादक
डॉ० रुद्रदेव त्रिपाठी
एम० ए० (संस्कृत-हिन्दी), पी-एच० डी०, डी० लिट्०

श्री लालबहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ
(मानित विश्वविद्यालय)
नई दिल्ली-११००१६

प्रकाशकः
कुलपतिः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित–विश्वविद्यालयः)
कटवारियासरायः, नई दिल्ली–११००१६

द्वितीयं संस्करणम्–२००२ ई०

ISBN : 81-87987-04-9

मूल्यम्–रु० ९८.००

मुद्रक–
अमर प्रिंटिंग प्रैस
८/२५, विजय नगर, दिल्ली–११०००९
दूरभाष : ७२५२३६२

प्रधान-सम्पादकीय

हमारे प्राचीनतम वाङ्मय में अनेक महनीय रत्न छिपे पड़े हैं, जैसे-जैसे मानव ने भौतिक-जगत् के प्रति अपनी अनुरक्ति को अग्रसर किया, उसकी प्राचीन के प्रति उपेक्षा भी बढ़ती गयी, जिसका परिणाम यह हो रहा है कि हम उन रत्नों से वञ्चित होते जा रहे हैं। ऐसा ही एक महान् रत्न है—गायत्री-मन्त्र। जिस महान् संस्कृति का मूल उत्स हिमालय की उन्नततम चोटी से धवल-धारा के रूप में बहा, जिसके उद्गाता महर्षि अपनी ऋतम्भरा प्रज्ञा को उपासना-साधना से संवलित कर तत्त्व प्रस्तुत कर गये और जिसका शाश्वत साहचर्य पाकर भारतीय आर्यजनों ने अपनी अभ्युन्नति के पथ को प्रशस्त किया, उन सब का सारतत्त्व **'गायत्री-मन्त्र'** में निहित है और इसीलिये कहा जाता है—**"न गायत्र्याः परो मन्त्रः"**

सहस्रों वर्षों से चली आई गायत्री-मन्त्र के प्रति द्विजमात्र की प्रगाढ आस्था ने साधकों के लिये विभिन्न मार्गों का उपदेश किया है। ये उपदेश आगम, तन्त्र और स्तोत्रों में गुम्फित कर एक ऐसी मञ्जूषा में रख दिये गये हैं जिनका ज्ञान विशिष्ट चिन्तकों, गुरु-परम्पराओं तथा प्रत्यक्ष निर्देशनों से ही प्राप्य है। बिना सङ्केत के किसी रहस्य को जानने की उत्कण्ठा भी नहीं होती है। वेदों में भी ऐसे सङ्केतदायी मन्त्र बहुधा प्राप्त हैं। यथा —

अप्सु मे सोमोऽब्रवीदन्तर्विश्वानि भेषजा।
अग्निं च विश्वशम्भुवम्॥

ऋग्वेद के इस मन्त्र में सङ्केत किया गया है कि— जलतत्त्व में संसार के सभी रोगों की समस्त औषधियां बीजरूप से विद्यमान हैं और साथ ही जगत् का कल्याण करनेवाली अग्नि भी। यह इस बात का सूचक है कि कायिक एवं मानसिक दोनों प्रकार के रोगों का शमन करने की शक्ति जल में निहित है और इसी के आधार पर जल-चिकित्सा-प्रणाली का विकास हुआ है। वेदमन्त्रों के त्रिविधार्थों के परिज्ञान की सार्थकता भी तभी सत्य होती है जब उनके सङ्केतों से निर्दिष्ट प्रक्रियाओं को आत्मसात् कर तदनुरूप लाभ प्राप्त किये जाएँ।

जैसे घृत दूध में छिपा रहता है पर उसको प्राप्त करने के लिये प्रक्रिया आवश्यक होती है इसी प्रकार मन्त्रद्रष्टा ऋषि विश्वामित्र द्वारा **'गायत्री-स्तवराज'** के माध्यम से तथा अन्यान्य आचार्यों द्वारा विहित-स्तोत्रादि के द्वारा कुछ रहस्य सङ्केतित हैं। विद्यापीठ के शोध-सङ्काय

में वर्षों तक कार्य करते हुए डॉ० रुद्रदेव त्रिपाठी ने अपनी गुरुपरम्परा से भी बहुत कुछ प्राप्त किया है और लिखा भी है। 'गायत्री-वरिवस्या' नामक यह लघु-पुस्तिका उनके अन्वेषण, अध्यवसाय तथा गुरुकृपा की एक लघु परिणति के रूप में सङ्कलित है। इसमें इनके द्वारा सम्पादित स्तोत्र एवं लेख मां गायत्री तथा सन्ध्योपासना के विभिन्न रहस्यों को उद्घाटित करने की दिशा में एक अभिनव प्रयास है। मैं डॉ० त्रिपाठी को इसके लिये बधाई देता हूं और उनके सुखमय दीर्घजीवन की कामना करते हुए विद्वान् पाठकवृन्द इससे अवश्य लाभान्वित होंगे ऐसी आशा करता हूं।

डा० मण्डन मिश्र
प्राचार्य

प्रारम्भिक निवेदन

भगवती गायत्री की उपासना वैदिक-काल की सबसे महत्त्वपूर्ण देन है। महर्षियों की सर्वप्रथम साधना का मुख्यद्वार गायत्री-साधना से ही अनावृत होता था। जो भी प्रसिद्ध सिद्ध-पुरुष हुए हैं, उनकी सिद्धियों की मूलभूमि गायत्री-मन्त्राराधना से ही सुदृढ हुई है, यह भी प्राचीन शास्त्रों, आगमों तथा पुराणों से सुप्रतिपादित है। वशिष्ठ और विश्वामित्र के आख्यान-प्रसङ्गों तथा **'वशिष्ठ-संहिता'** एवं **'विश्वामित्र-कल्प'** आदि ग्रन्थों से भी यही व्यक्त होता है कि वे गायत्री की आराधना करके ही दिव्य सिद्धियां प्राप्त करने में सफल हुए। **'गायत्री-पञ्चाङ्ग'** में चिरकाल से '१- **गायत्री पुरश्चरणविधि'** (जिसमें विश्वामित्र कल्प एवं अन्यान्य तन्त्रों के प्रमाण संगृहीत हैं), २- **गायत्री-कल्प** (विश्वामित्र कृत, जिसमें क्रमशः '(१) **आह्निक-लक्षणयोग**, (२) **आचमनयोग**, (३) **प्राणायामयोग**, (४) **मार्जनयोग**, (५) **अर्घ्यदानयोग**, (६) **आवाहनादियोग** तथा (७) **त्रिकालजपयोग'** नामक सात परिच्छेद हैं, ३-**गायत्र्युपनिषद्** (हृदय), ४- **गायत्री-पद्धति** और ५- **गायत्री-स्तवराज** समाविष्ट हैं। ये सभी गायत्र्युपासना के लिये परमोपयोगी निर्देश करते हैं किन्तु इनमें ऐसे अनेक स्थल भी हैं, जिनका वास्तविक अर्थ अथवा प्रक्रिया आज भी अनुद्घाटित ही है और इनके वास्तविक शुद्धपाठ पर भी विद्वानों ने ध्यान नहीं दिया है।

विश्वामित्रकृत **'श्रीगायत्री-स्तवराज'** जो अब प्रकाशित रूप में उपलब्ध होता है उसमें २७ पद्य ही प्राप्त हैं। इन पद्यों के पाठ भी बहुधा भ्रमपूर्ण हैं जब कि अर्थानुसन्धान से पूर्ण सन्तोष तो होता ही नहीं है। बाल्यकाल से इस स्तोत्र के पाठ और विभिन्न गायत्रीजप की प्रक्रियाओं को हृदयङ्गम करने की भावना से प्रेरित होकर हमने विद्वज्जनों और उपासकों से जिज्ञासाएँ भी व्यक्त कीं, किन्तु कोई उचित समाधान नहीं मिल पाया।

सौभाग्यवश पूज्यपाद स्वामी **श्रीविद्यारण्यजी** (उनके अनुसार 'मूर्खारण्य जी') **महाराज** की कृपा प्राप्त हुई। आपका अगाध वैदुष्य, आगममन्त्रादि का समग्र ज्ञान तथा उपासना सभी महान् थे। जब आपके समक्ष स्तवराज की बात की, तो आपने अपने जीवन से सम्बद्ध घटना का वर्णन 'जिसमें दण्ड-ग्रहण करने पर भी दण्ड त्याग, मेरठ में चौबीस लक्ष गायत्री जप के बाद भी भोजनाच्छादन-रहित ब्राह्मण के लिये वास्तविक गायत्रीजप विधि के परिज्ञान की उत्कण्ठा' प्रेतात्मा द्वारा निर्देश, तदनुसार वशिष्ठसंहिता एवं विश्वामित्रसंहिता की खोज तथा एक विद्वान् द्वारा मूल प्रति न दिखाने के कारण रामगङ्गा में आत्मोत्सर्ग के लिये गहरे जल में पहुंचने पर मां की कृपा से बहते आये उसी ग्रन्थ के पत्रों की प्राप्ति आदि' बहुत ही रोमाञ्चकारी प्रसङ्ग थे'—सुनाया। हमारी लालसा और बढ़ी तथा हमने वे पत्र एवं अन्य उपलब्ध गायत्री-सम्बन्धी साहित्य प्राप्त करने का बराबर वर्षों तक प्रयत्न किया। फलतः जैसी-जैसी हमारी योग्यता और ग्रहण-धारण शक्ति को उन्होंने परखा उसके अनुरूप प्रसाद दिया, किन्तु हमारे दुर्दैववश

उनका कुछ मास पूर्व ही स्वर्गवास हो गया और हमारी कामना अपूर्ण ही रह गयी।

यहां जो '**गायत्री-स्तवराज**' मुद्रित किया जा रहा है यह उन्हीं की कृपा का फल है। इसमें विधिवत् विनियोग, ऋष्यादिन्यास, कर-हृदयादिन्यास और ध्यान के पश्चात् स्तवराज प्रारम्भ होता है। इसके पद्यों की सख्या ६७ है। प्रायः सभी पद्य स्तुत्यात्मक होने के साथ ही गायत्री-मन्त्रविषयक रहस्यों से परिपूर्ण भी हैं। यह हमारे स्तोत्र-साहित्य की 'मन्त्र-यन्त्र-तन्त्रगर्भात्मक' पद्धति में रचित स्तव है। इसकी ३-४ हस्तलिखित पाण्डुलिपियाँ, जो कि साधकों द्वारा सादे कागजों पर अपने ही दैनिक पाठ के लिये लिखी हुई थीं; उन्हीं की कृपा से प्राप्त हुईं। इनमें अनेक पाठान्तर, खण्डित एवं अप-पाठ हैं। संस्कृत-व्याकरण एवं छन्द की दृष्टि से भी ये चिन्त्य हैं तथा बहुत प्रयत्न करने पर भी हमें कोई शुद्ध पाठवाली प्रति नहीं मिल सकी और उनके पास जो 'विश्वामित्रसंहिता' आदि साहित्य था, वह भी यत्र-तत्र पहुंच गया। अतः हमने यह निर्णय किया कि इसे यथाप्राप्त रूप में ही मुद्रित कर प्रकाश में लायें। ऐसा करने से सम्भव है, कहीं किसी के पास से कोई शुद्ध पाठ मिल सके। एक बार हमने इसी स्तवराज की एक प्रति हिमाचल के प्रसिद्ध विद्वान् '**श्रीकाशीनाथजी शास्त्री**' के पास श्रीचामुण्डाजी में देखी थी। उनका कहना था कि यह **अथर्ववेद की पिप्पलादशाखा से** सम्बद्ध है, किन्तु उसका समयाभाव से हम उपयोग नहीं कर पाये। हमें जो चार प्रतियां प्राप्त हैं उन्ही को **क-ख-ग-घ** संज्ञा देकर यहां पाठान्तर दिये गये हैं अतः उनका विशेष परिचय अनावश्यक है।

पूज्य स्वामीजी के निकट बैठकर हमने इस स्तवराज को समझने-पढ़ने का भी प्रयास किया था, तभी उन्होंने कुछ मन्त्र-सङ्केत दिये थे, जिन्हें सङ्कलित कर लिया था किन्तु वे भी पूरे पद्यों पर नहीं ज्ञात हो सके। हमारी यह बलवती इच्छा थी कि इस स्तवराज पर एक विशद '**संस्कृत-भाष्य**' लिखा जाए और अब भी इच्छा है ही। इन्हीं सब दृष्टियों से यह स्तवराज, जो कि '**ब्रह्मतान्त्रिक**' अथवा '**ब्रह्मतन्त्र**' में विश्वामित्र द्वारा प्रणीत है, हम विद्वान् पाठकों और साधकों की सेवा में प्रस्तुत कर रहे हैं। हम यह आशा करते हैं कि इसकी अन्य शुद्ध पाठवाली प्रति और सम्बद्ध पद्यों के रहस्यों को उद्घाटित करनेवाला साहित्य यदि कहीं किसी के पास उपलब्ध हो, तो हमें लोकोपकारार्थ प्रदान कर अथवा सूचित करने की, अवश्य कृपा करेंगे।

इस स्तवराज के साथ ही १-नैगमिकागमिकानुसन्धानयोरालोके '**गायत्री-मन्त्रसाधना-विमर्शः**, एवं २-सर्ववेदसार-भूत गायत्री-मन्त्र, ३-**निगमागमसम्मत-पञ्चकाल-सन्ध्या : एक विश्लेषण, एवं** ४-**त्रिपदा गायत्री-स्तोत्र** को सम्मिलित करके स्वतन्त्र रूप से '**गायत्री-वरिवस्या**' नामक यह लघु-पुस्तिका प्रकाशित की जा रही है। इसके लिये मैं **राष्ट्रिय-संस्कृत-संस्थान के निदेशक, श्रीलालबहादुरशास्त्री केन्द्रीय संस्कृत विद्यापीठ के** प्राचार्य एवं शोध-प्रभा "**त्रैमासिक शोध-पत्रिका**" के **प्रधान-सम्पादक** मान्यवर **डा० मण्डन मिश्र जी** का हृदय से आभार मानता हूं। जिनकी कृपा-पूर्वक स्वीकृति से इस दुर्लभ साहित्य के प्रकाशन का मुझे अवसर प्राप्त हुआ।

माघ-पूर्णिमा
२०४३ वि० सं०

विनीत—
डा० रुद्रदेव त्रिपाठी (सम्पादक)

विषयानुक्रमणिका

१—श्री गायत्री-स्तवराजः (मन्त्र सङ्केत-टिप्पण्याऽलङ्कृतः) नैगमिकागमिकयोरनुसन्धानालोके—	१-१६
२—गायत्री-मन्त्र-साधना-विमर्शः	१७-३२
३—सर्ववेद-सारभूत गायत्री मन्त्र	३३-४२
४—निगमागम-सम्मत पञ्चकाल सन्ध्या : एक विश्लेषण	४३-६४
५—रुद्रयामलोक्तं-त्रिपदा-गायत्री-स्तोत्रम्	६५-६७
६—गायत्रीजपाविविचारः	६८-७०

✶

ब्रह्मतन्त्रान्तर्गतः श्रीविश्वामित्र-महर्षि-प्रोक्तः

श्रीगायत्री-स्तवराजः

['मन्त्र-सङ्केत'-टिप्पण्याऽलङ्कृतः]

卐

स्तवराजं प्रवक्ष्यामि, सर्वमन्त्र-फलप्रदम् ।
मन्त्रोद्धारं तथा यन्त्र[1]-साधनं परमोत्तमम् ॥१॥
आसीनो[2] वा शयानो वा, गच्छँस्तिष्ठँस्तथैव च ।
मन्त्रराजं जपेद्[3] भक्त्या, प्रत्यवायो न विद्यते ॥२॥

विनियोगः —

ॐ अस्य श्रीगायत्रीस्तवराजस्तोत्रमहामन्त्रस्य नूतनसृष्टिकर्ता विश्वामित्र **ऋषि**-र्गायत्र्यादि-नानाविधानि च्छन्दांसि सकलजननी चतुष्पदा गायत्री देवता **ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं** (प्रथमपादो) बीजं, (**ॐ**) **भर्गो देवस्य धीमहि** ॐ (द्वितीयपादः) शक्तिः, **ॐ धियो यो नः प्रचोदयात्** (तृतीयपादः) कीलकं, दशप्रणव-संयुक्ता सव्याहृतिका तुर्यपाद-सहिता गायत्री व्यापकं, मम धर्मार्थकाममोक्षार्थे जपे/पाठे विनियोगः ।

ऋष्यादिन्यासः —

नूतनसृष्टिकर्तृ-विश्वामित्र-ऋषये नमः (शिरसि)। नानाविधच्छन्दोभ्यो नमः (मुखे)। सकलजननी-चतुष्पदा-गायत्रीदेवतायै नमः (हृदये)। ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्य बीजाय नमः (गुह्ये)। ॐ भर्गो देवस्य धीमहि शक्तये नमः (पादयोः)। ॐ धियो यो नः प्रचोदयात् कीलकाय नमः (नाभौ)। **ॐ** १० भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो यो नः प्रचोदयात् ॐ परोरजसे सावदोम् व्यापकाय नमः (सर्वाङ्गे)। विनियोगाय नमः (करसम्पुटे)।

कर-षडङ्ग-न्यासाः —	(प्रथमवारम्)	(द्वितीयवारम्)।
ॐ भूः तत्सवितुर्वरेण्यं ह्लां	(अङ्गुष्ठाभ्यां नमः।	हृदयाय नमः)।
ॐ भुवः भर्गो देवस्य धीमहि ह्लीं	(तर्जनीभ्यां नमः।	शिरसे स्वाहा)।
ॐ स्वः धियो यो नः प्रचोदयात् ह्लूं	(मध्यमाभ्यां नमः।	शिखायै वषट्)।
ॐ महः परोरजसे सावदोम् ह्लैं	(अनामिकाभ्यां नमः।	कवचाय हुम्)।
ॐ जनः आपो ज्योतीरसोऽमृतम् ह्लौं	(कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्)।
ॐ तपः सत्यं ब्रह्म भूर्भुवः स्वरोम् ह्लः	(करतल-करपृष्ठाभ्यां नमः।	अस्त्राय फट्)।

---

१. यन्त्रं साधनं, २. आसनस्थः, ३. पठेद् इत्यादि-पाठान्ताराणि ।

गायत्री-ध्यानम्

गायत्रीं वेदधात्रीं शतमखफलदां वेदशास्त्रैकवेद्यां,
चिच्छक्तिं ब्रह्मविद्यां परमशिवपदां[1] श्रीपदं वै[2] करोति।
सर्वोत्कृष्टं पदं तत्सवितुरनु पदान्ते[3] वरेण्यं शरण्यं,
भर्गो देवस्य धीमह्यभिदधति धियो यो न इत्येव तेजः[4]॥

(इति ध्यात्वा मानसैः पञ्चोपचारैः सम्पूज्य स्तवराजं पठेत्।)

मूलपाठारम्भः

[5]साम्राज्यबीजं प्रणवत्रिपादं,[6] सव्यापसव्यं प्रजपेत् सहस्रम्।
सम्पूर्णकामं[7] प्रणवं विभूतिं,[8] तथा भवेद् वाक्यविचित्रवाणी[9] ॥१॥

सङ्केतकृन्मङ्गलम् —

माङ्गल्यं दिशतान्नित्यं वेदमाता गरीयसी।
गायत्री निरतं भक्त्या द्विजवृन्दैर्निषेविता ॥१॥
गुरवो विजयन्तां ते विद्यारण्याभिधाः सदा।
येषां कृपा-प्रसादेन मन्त्राः सन्ति प्रकाशिताः ॥२॥
गायत्री स्तवराजेऽस्मिन् पद्येषु ग्रथिताः क्वचित्।
मन्त्राः सङ्केतरूपेण 'रुद्र'स्तान् विवृणोम्यहम् ॥३॥

(मन्त्र-सङ्केतः)[10]—सौं सकल ह्रीं ॐ तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्, त्यादचोप्र नः यो योधि हिमधी स्यवदेर्गोभ ण्यंरेवंतुविस तत् ॐ ह्रीं सकल सौं।

ओङ्कार-शब्दोऽखिललौकिकं च, श्रीभूर्भुवः स्वर्महरेव युक्तम्[11]।
जनस्तपः सत्यमथोदितं च, कैलास-वैकुण्ठमयोर्ध्वकेशः[12] ॥२॥

(म० स०) —ॐ भूर्भुवः स्वः महः जनः तपः सत्यं श्रीं तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्, ॐ भूर्भुवः स्वः महः जनः तपः सत्यं श्रीं।

---

१. शिवपरं २. व्याकरोति पा.। ३. पदं ते। ४. यो नः प्रचोदयादित्यौर्वतेजः (इति पाठान्तरम्। तच्च छन्दोभङ्गाय कल्पत इत्यनङ्गीकार्यम्।)

५- घ- प्रताविदं चतुर्थं पद्यम्।

६. प्रणवं त्रिपादं। ७. सोमं। ८. प्रभवेद्विभूतिर्भवेत् तथा सोमप्र०। ९. वाक्य-विचित्रवर्णाम् ॥४॥

१०. प्रस्तुत स्तवराज के प्रत्येक पद्य में गायत्री-मन्त्र के विभिन्न प्रकार के मन्त्रों के सङ्केत प्राप्त हैं। उन्हीं को यहां क्रम से दिया जा रहा है। इन मन्त्रों के प्रयोग गुरुमुख से ज्ञातव्य हैं। (सम्पादक)

११. सूक्तम्। १२. पयोधिकेशम्, (क) पयोधिकेश !।

गायत्री-पद-महिमा —

तदष्टरूपे[1]ऽष्टक-भैरवाश्च, यद् विश्वरूपं सवितुः प्रसिद्धम्।
चैतन्यमेतत् कथितं वरेण्यं, यत् सच्चिदानन्दपदं च भर्गः ॥३॥

भर्गो हि देवः परमेश्वरोऽसौ, तद्[2] धीमहीतीश्वरमेव नित्यम्।
यो नो धियो यः परभक्तिभाजं[3], प्रचोदयात् सा त्रिपदा प्रसिद्धा ॥४॥

मं० स०—यहां जप के समय गायत्री-मन्त्र के पदों का अर्थ-चिन्तन करने का सङ्केत किया गया है।

ततः परो वै रजसे प्रसिद्धं, यत् सावदों तत् कथितं चतुर्थम्।
पादं त्रिपाद्याः परमेश्वरेण, त्रय्येहितं[4] धारयितुं नरेण[5] ॥५॥

(म० स०) —(ॐ भूर्भुवः स्वः) तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्, परो रजसे सावदोम्। इयं (तुरीयपादसहिता गायत्री।)

अनामयं[6] तत्सवितुर्वरेण्यं, भर्गो हि देवस्य शिवाय[7] धीमहि।
ऋतं सतां क्लेशहरं हिताय, धियो हि यो नः सततं प्रचोदयात्[8] ॥६॥

ततः परो वै रजसे च सावदों, श्रीं-बीजयुक्तं कथितं चतुर्थम्।
भूरादि-सप्त[9]-प्रणवोदितं वै, तद् विंशतेरक्षर[10]कार्यसिद्धिः ॥७॥

(म० स०) —ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ ऐं तत्सवितु० ॐ क्लीं भर्गो देवस्य० ॐ सौः धियो यो नः० ॐ श्रीं परो रजसे सावदोम्।

गायत्री-मन्त्र-स्वरूपम् —

ब्रह्मस्थाने त्रिकोणे प्रणवपरिलसद् व्याहृतिं[11] सप्त त्रीणि,
सर्वं[12] दिक्साध्यमेकं सकल-शिवमयं सर्वकामप्रदोग्ध्री[13]।

---

१. सच्छब्दरूपे० (क), तच्छब्द० (ख)।

२. तं—(क), ३. भाजः।

४. नार्यैहितं पाठा० (क), ५. नराणाम् (क)


६. अनाम यत्तत् (घ) शुभाम०(क) सुखाय (घ), ७. शर्न(क), ८. इतः परं—गायत्री-हृदयमिति पद्यमपि घ-प्रतौ।

९. सर्व० (क), १०. विंशतिम० (क) द्वात्रिंशती० (घ)।

११. व्याहृती० (क), १२. सर्वा (क), सर्वे दिक्संख्यभागं० (घ), १३. कलिमलध्वंस-चक्रस्वरूपम्। इति पाठा०, (क) कामं प्रदोग्धि।

दिग्बन्धं धीमहीति त्रिपद-पदमितं[1] यो महः सर्वविश्वं,
विश्वं कामप्रभावं सकल-कलिमलध्वंस-चक्रस्वरूपम् ।।८।।

(म० स०) —१. इस पद्य में गायत्री-यन्त्र का सङ्केत है। यह यन्त्र त्रिकोण और षोडशदल कमल से बनता है तथा त्रिकोण में ७ प्रणव, उसके बाहर सप्तव्याहृतियां, कमलदलों में दस महाविद्याओं के नाम तथा दलों के बाहर दस अवतारों के नाम लिखे जाते हैं। यन्त्र का स्वरूप इस प्रकार है—



भूरादिसप्त प्रणवादि सप्त, देवी त्रिपादा त्रिशिरः शिखानि ।
परं चतुर्थं प्रणवोदितानि, पश्चाद्भवो ध्यानशिवं शिवानि ! ।।९।।

(म० स०) —**ॐ** भूः ॐ सत्यं ॐ तत् सवितु० ॐ भर्गो० ॐ धियो० ॐ आपो ज्योती रसोऽमृतं ॐ अर्चयन्ति तपः सत्यं मधु क्षरन्ति यद् ऋचः, ॐ परो रजसे सावदोम् ।।१।। ॐ अर्चयन्ति तपः सत्यं मधु क्षरन्ति यद्ऋचः । ॐ परो रजसे सावदोम् । **ॐ भूः ॐ सत्यं** ॐ तत् सवितु० ॐ भर्गो० ॐ धियो० **ॐ आपो ज्योती रसोऽमृतं** ॐ परो रजसे सावदोम् ।

---

१. शिवमयी० । पाठा० (क), परिमितं, पदयुतं (घ) ।

कलात्रयसमन्वितं चक्रचिन्तनम् —

मूलाधारे हुतवह[1]कला-मिश्रितं भूर्भुवः स्व-
ब्रह्मस्थाने परम-गहने तत्सवि(वी)तुर्वरेण्यम् ।
भर्गो देवस्य[2] च शशिकला[3] धीमहीत्येकरूपं,
धी(धी) यो यो नः परमममृतं चोदयाद्[4] वै परस्मात् ॥१०॥

मं०सं०—यहां गायत्री-मन्त्र का शरीरस्थ तीन प्रमुख चक्रों में चिन्तन का प्रकार बतलाया है जिसमें अग्नि, सूर्य और चन्द्रमा की कलाओं के साथ मन्त्र-जप का विधान है ।

ब्रह्मास्त्र-ध्यानम् —

सर्वास्त्रोद्दीप्तहस्तं[5] सुररिपु-रुधिरक्रोध[6]-मुद्राङ्कितास्यं,[7]
भूषारत्नोज्ज्वलाङ्गं द्विजवर-हृदयावास[8]मादित्यरूपम्[9] ।
मन्देहानाम-दैत्य-ग्रसनपटुतरं घोर-जिह्वा-करालं,
ध्यायेद् ब्रह्मास्त्रमाद्यं लयसमयमहा[10]वीतिहोत्र-स्वरूपम् ॥११॥

मं०सं०—यह पद्य षडर्घ्य-प्रयोग में अर्घ्यदान के समय ब्रह्मास्त्र के ध्यान में प्रयुक्त होता है । इसका मन्त्र अन्यत्र दिया गया है ।

ब्रह्मदण्ड-ध्यानम् —

सर्वास्त्राणां स्वशक्त्या[11] कृतमरुणरणत्कार-घोरैकपिण्डं,
ब्रह्माण्डान्तर्विधाना[12] भवनकरमदो ऋग्विशेषोग्रमूर्तिः ।
जाज्वल्योग्रं त्रिनेत्रं रविरुपजपति स्वादितं[13] शास्त्रजालं,
भालाक्षाम्भोजनाभि[14]र्भुजभुवनलयं चिन्तये ब्रह्मदण्डम्[15] ॥१२॥

मं०सं० —यह भी पूर्ववत् अर्घ्यदान के समय ब्रह्मदण्ड के ध्यान का पद्य है ।

---

१. धृतबहु० । २. देवं नुतनययुतं० । ३. नुतनयतु तं — (क), त्येकयुक्तं० । (क), त्येवरूपं (घ), विधानं, अत्र पद्ये पदे सवितुरितिवि-इत्यस्य तथा धियो-इत्यत्र धि-इत्यस्य छन्दोभङ्गभिया दीर्घेकार पाठ आर्षः स्वीकार्यः । ४. प्रचोदयात् (क) ।

५. सर्वास्त्रादित्यहस्ता० सर्वास्त्रैर्दीप्ति० (क) सर्वैश्चादित्यहस्ता (घ) ६. रुधिराक्षोद० रुधिराक्रोधा० । ७. मुद्राङ्किताढ्यं० । मुद्राङ्कितं च (घ), ८. हृदयानन्द० (क), ९. पटुनटा-घोरनिद्रा०, १०. (बीजम्), ११. महा० भूषारत्न० (क) इति पदव्यत्ययः ।

१२. सर्वास्त्राणां च शक्त्या क्रम०(घ)(क), १३. द्विजानामवनिकृतमिदं—ऋग्विशेषोग्रमूर्तिम् । (क), १४. रुपजयति(घ)१५. मन्त्रजालं(घ), १६. भालाक्षाम्भोजनाभां(घ) योजना ।

ब्रह्मशीर्ष-ध्यानम् —

तेजःपुञ्जमयं प्रसन्नममलं चाध्यात्मकं योगहृद्,[1]
ध्यायेद् भूषण[2]-भूषणं निरुपमं श्रेष्ठं[3] त्रिमूर्त्यात्मकम्।
नित्यं भास्करवैरिवाहनघनासृक्[4]पूर्ण-पूर्णार्थदं,
ह्यस्त्रं ब्रह्मशिरोभिधानममलं ध्यायेद् द्विजः कर्मगः ॥१३॥

मं०सं०—यह भी पूर्ववत् अर्घ्यदान के समय ब्रह्मशीर्ष के ध्यान का पद्य है।

गायत्र्या विराट्स्वरूप-चिन्तम् —

अधिलोकं[5] यस्य पादौ[6], यस्याधिज्यौतिषं मुखम्।
अधिविध्यं पक्षयुगं, यस्य पक्षमधि प्रभुः ॥१४॥
अधिदेवं यस्य गृहं, देहं यस्याधिभौतिकम्।
यस्य स्वरूपमध्यात्मं, तत्स्वरूपं विचिन्तयेत् ॥१५॥

(म० स०)—ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्। ॐ परो रजसे सावदोम्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्। ॐ अर्चयन्ति तपः सत्यं मधु क्षरन्ति यद् ऋचः। नमः।

अस्त्र-त्रय-मन्त्र प्रयोग-फलनिरूपणम् —

अस्त्रं शस्त्रहतं त्वघोरसहितं दण्डेन बीजाहतं,[7]
चादित्यादिहितं शिरोऽन्तसहितं पापक्षयार्थं परम्।
तुर्य्यान्त्यादि-विलोममन्त्रपठनं बीजं शिखान्तोर्ध्वकं,
नित्यं कालनियम्य विप्रविदुषां किं दुष्कृतं भूसुराः[8] ॥१६॥

मं०सं०—यहां अघोर-मन्त्र का भी सङ्केत है, जिसका स्मरण भी गायत्री-मन्त्रजापी के लिये आवश्यक माना गया है।

---

१. योगि० (क), २. भासुर० (क-घ)। ३. वाहपिशितं० (क), ४. ०प्रकर्मादित, विकर्मा० (क) सृष्टं (घ) शिरोऽभिघात० (घ)।

५. अधिलोकस्य यत्पादौ० (क) अधो लोकं० (क-घ) ६. वचः। नाभौ ब्रह्म हृदि देवि ललाटे शिवसन्निभम् ॥१६॥ (क.)

७. वाजीहतं० (घ) ८. (चिन्त्यः पाठः ?)

ब्रह्मास्त्रं ब्रह्मदण्डं शिरसि शिखिमहद् ब्रह्मशीर्षं[1] नमोऽन्तं,
सूक्तं नारायणोक्तं[2] प्रणवमथ महावाक्यसिद्धान्तमूलम् ।
तुर्यं त्रीणि द्वितीयं प्रथम[3]मनु-महावेद-वेदान्तसूक्तं,
नित्यं स्मृत्यानुसारं नियमितचरितं मूलमन्त्रं नमोऽन्तम् ॥१७॥

मं०सं०—यहां नारायण सूक्त, पुरुषसूक्त एवं तत्त्वमसि इत्यादि महावाक्य सिद्धान्तों का निर्देश है, जो कि प्रयोग की दृष्टि से ज्ञातव्य है।

त्रिकालनित्यं त्रिशतं त्रिवारं, त्रिपाद-तुर्यं त्रिविधं त्रिवारम्[4] ।
त्रिलोकमाद्यं परमं त्रिलोकं[5], गायत्रिमन्त्रं[6] प्रजपेत् सहस्रम् ॥१८॥

(म० स०) —ॐ चतुर्थपादयुक्तं (मूलमन्त्रं) शतत्रयं त्रिकालं जपेत् । शेषं त्रिव्याहृति-युतं चतुर्थपादं त्रिकालमेकसहस्रं जपेत् । ॐ परो रजसे सावदोम् ॐ भूर्भुवः स्वः ॐ परो रजसे सावदोम् । इति ।

पादत्रयं[7] ब्रह्मपदत्रयं च, कालत्रयं चैव शतत्रयं च ।
जप्त्वा फलं प्राप्य महाप्रभावं[8], बिन्दुत्रयं बन्धविमोक्षणं च ॥१९॥

(म० स०) —ॐ परो रजसे० ॐ आपो० ॐ तत्सवितु० ॐ भर्गो० ॐ धियो० ह्रौं ॐ भूर्भुवः स्वरोम् ।

पीठत्रयं ध्यानपदत्रयं च, परोरजः पञ्चपदत्रयं च ।
बिन्दुत्रयं बन्धत्रयं शिवं च, कालत्रयं ज्ञानपरं भुवं च ॥२०॥

तान्त्रिक-मन्त्रराज विधानम् —

बालानुलोमं त्रिपदानुलोमं, बालाविलोमं त्रिपदाविलोमम् ।
एवं जपेत्तान्त्रिकमन्त्रराजमाद्यन्तबीजं प्रणतोऽस्मि नित्यम्[10] ॥२१॥

(म०प०) —ॐ ऐं क्लीं सौः (गायत्री) सौः क्लीं ऐं ॐ गायत्रीमन्त्र के लोम-विलोम मन्त्रजप का यह विधान है।

---

१. महविषजान् ब्रह्मशीर्षे(घ), २. नारायणोक्तं ॐ (घ), प्रणववरमहान् ब्रह्मसिद्धान्त-मूलम् । (घ), ३. प्रणव० ।

४. त्रितारम् (क), ५. परमस्त्रि० (क), परितस्त्रिं ६. गायत्र० (क) ७. शेषे ? ।

८. पदत्रय—० (क), ९. प्राप्तमहत्प्रमाणं०, ३. बन्धविमोक्षणे च । (क) (घ) ।

१०. कालत्रयं ज्ञानभुवं च बाला—(बाला) नुलोमं त्रिपदानुलोमम् ।
बालानुलोमं किल मृत्युराजमान्द्यन्तबिन्दुं प्रणतोऽस्मि नित्यम् ॥ इत्यपि (घ) पाठः।

तुर्यं त्रिपादं[1] प्रणवादिमन्त्रं, तारत्रयं तुर्यपदान्तबिन्दुः।
तथैव बालात्रयबीजगर्भं, सहस्रजाप्यं[2] प्रणतोऽस्मि नित्यम् ॥२२॥

(म० स०) ॐ परो रजसे०[3] ॐ भूर्भुवः स्वः ऐं तत्सवितु० ॐ क्लीं भर्गो० ॐ सौः धियो० ॐ ऐं ह्रीं क्लीं श्रीं परो०।

गायत्री जपस्य यौगिकाः प्रकाराः —

सर्वोत्तमं प्रणव-पूर्वक-मन्त्रराजं, सद्भोगभोग्यसुखसम्पदि हेतुभूतम्।
नाडीत्रयं प्रणवसम्पुटितं नियम्य, यद् भावितं[4] सकलसाधकचित्तवृत्तिम् ॥२३॥

(म० स०) —ॐ तत्सवितु० (फलं भाग्यसुखदं)। ॐ तत्सवितु० ॐ भर्गो० ॐ धियो० ॐ (फलं) सकलज्ञानम्।

अन्तर्बाह्यमति[5]प्रभावमनिशं निःशेषतो रेचयेत्,
सम्यग्ज्ञानमतं च[6] लक्षणपरं यं[7] पूरयेदात्मनि।
प्रत्यग् ब्रह्मणि जीवभावमखिलं लीनं गतं[8] कुम्भके,
प्राणायामनिगर्भ-ब्रह्मविधिना[9] निर्वाणयोगी भवेत् ॥२४॥

सञ्चिन्तयेत् त्रिपद-तुर्य-शिरः-शिखान्तं,
सव्याहृति-प्रणवसम्पुटितं त्रिपादम्।
ध्यातं[10] प्रभातसमये दशसप्तवारं[11],
सर्वोत्तमं सकलमन्त्रपदं[12] वरिष्ठम् ॥२५॥

(म० स०) —ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं, ॐ ॐ भर्गो देवस्य धीमहि ॐ ॐ धियो यो नः प्रचोदयात् ॐ परो रजसे सावदोम् ॐ ॐ आपो ज्योती रसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् ॐ ॐ अर्चयन्ति तपः सत्यं मधु क्षरन्ति यद्ऋचः ॐ।

ओङ्कारमादिगुरुमूल-मनुं प्रलब्धं,
षष्ट्यात्मकं[13] प्रणवसम्पुटितं त्रिपादम्।
[14]अङ्गप्रधानसहितं भुवि सप्तलोकं,
सर्वोत्तमं दशपदं दशबीजराजम् ॥२६॥

(म०स०) —ॐ ह्री अं···क्षं ॐ तत्सवितु० ॐ ॐ भूः नमः ॐ ॐ भुवः स्वाहा ॐ ॐ स्वः वषट् ॐ ॐ महः हुं ॐ ॐ जनः वौषट् ॐ ॐ तपः अस्त्राय फट् ॐ ॐ सत्यं नमः।

---

१. वारं? त्रिपाद— (क) २. जप्त (क) ३. ऐं ह्रीं श्रीं क्लीं?।
४. यद्भासितं० सद्— (घ), माधन० (घ)।
५. मणि० (क), अन्तर्बाह्यमतं (घ), वाच्य० ज० ६. मनन्त० (क) ७. यत्, (क.)।
८. गते (क) ९. त्रिब्रह्मगर्भवि०।
१०. ध्यानं (क) ११. सप्तशिश्च (क) १२. परं विशिष्टम् (क)।
१२. प्रणवमष्टपदं त्रितारम। १३. षष्ठात्मकं (क), १४. विश्वं० (क) प्रवृद्धं।

सिद्धं प्रसिद्ध-पुरुषोत्तम-वेदवेद्य—
मादित्रयं जनकमस्य समानसर्वम्[1]।
अन्योन्यभावगुणनिर्गुणमन्त्रयोगं,
सर्वोत्तमं प्रणवपूर्वकमन्त्रराजम् ॥२७॥

(म०स०) —अं···क्षं, १६ मन्त्राः पुरुषसूक्तस्य, ॐ ४, मन्त्र (गायत्री) ॐ ॐ तत्स-वितु० परो० भर्गो० परो० धियो० परो०।

सर्वोत्तमं त्रिपद-तुर्यक-पूर्वमुक्तं,[2]
सव्याहृति[3] त्रिगुणसम्पुटितं शिखान्तम्।
सम्यग् गुरूक्तविधिपूर्वकवायुरोध-[4]
मायुष्यहेतुकरणं दशबीजराजम्[5] ॥२८॥

(म० स०) —सप्तव्याहृति-सहिता गायत्री।

गायत्र्या आयुष्कर-मन्त्रविधानम् —

वेदादिमायललिता[6]क्षरकामराजं,
सव्याहृति-प्रणवमन्त्रपदं त्रितारम्।
तारं त्रिपाद-सहितं शिरसा तुरीय—
मायुः करोति सुखदं सकलं नियम्य ॥२९॥

(म० स०) —ॐ ह्रीं हसकहलह्रीं सकल ह्रीं कएईल ह्रीं क्लीं भूः···सत्यं, ॐ अं कं चं टं तं पं यं शं ह्रीं श्रीं (पञ्चपदा गायत्री)। १- तत्स० २- भर्गो० ३- धियो० ४- परोरजसे० ५- आपो०।

स्वाधारमादिकुलकुण्डलिगर्भचक्रं,
षट्कोणबिम्बसहितं त्रिपदा तुरीयम्।
सप्तान्तचक्रविलसत्-प्रणवं त्रिबीजं,
ब्रह्माण्ड-खण्डसहितं परमात्मरूपम् ॥३०॥

तुरीय-यन्त्र-विधानम् —

तारं सुवृत्तं ह्यनलद्वयान्तं, कोणे तु ताराङ्कितताग्युग्मम्।
युग्मस्य मध्ये मनुवेष्टितं च, बालाक्षरं चैव तुरीय-यन्त्रम् ॥३१॥

(म०सं०)—यहां 'तुरीय-यन्त्र' बनाने का सङ्केत है। इसमें गोलाकार में ॐ तथा 'रं रं' बीज तथा कोनों में ओङ्कार-युग्म वाला मन्त्र के साथ गायत्री मन्त्र को वेष्टित करना चाहिये।

---

१. वर्णम् (घ)। २. सर्वयुक्तं (क), ३. सव्याहृतिं (क), ४. रोध आयुष्य०।
५. दशराजबीजम् (क) ६. सव्याहृतिं प्रणवमष्टपदं त्रितारम् (क)।

गायत्री-मन्त्र-महिमा —

शुभं शिवं शोभनमस्तु मह्यं, सौभाग्यभोगोत्सवमस्तु नित्यम्।
प्रकाशविद्यात्रयशास्त्रसर्वं[१] भजेन्महामन्त्रफलं प्रिये वै[२] ॥३२॥

नित्यं मुक्तिपदं नियम्य पवनं निर्घोप-शक्तित्रयं[३],
सम्यग्ज्ञानगुरूपदेशविधिवद् देवीं शिखां[४] तामपि।
षष्टयेकोत्तरसंख्ययाऽनु[५]गतसौषुम्नादिमार्गत्रयीं,
ध्यायेन्नित्यमशेषदेवजननीं देवीं त्रिसन्ध्यामयीम्[६] ॥३३॥

(म० स०) — सप्तव्याहृति० तत्सवितु० भर्गो० धियो यो नः० आपो ज्योती० अर्चयन्ती० अं···क्षं ॥

गायत्रीं सकलागमार्थविदुषां सौरस्यबीजेश्वरीं[७],
सर्वाम्नायसमस्तमन्त्रजननीं सर्वज्ञधामेश्वरीम्।
ब्रह्मादित्रयसम्पुटार्थकरणीं[८] संसारपारायणीम्,
सन्ध्यां सर्वसमानतन्त्रपरया[९] ब्रह्मानुसन्धायिनीम् ॥२४॥

एकद्वित्रिचतुःसमानगणना वर्णाष्टकं पादयोः,
पादादौ प्रणवादिमन्त्रपठने मन्त्रत्रयीसम्पुटाम्।
सन्ध्यायां त्रिपदं पठेत् परतरं सायं तुरीया-युतं,[१०]
नित्यानित्यमनन्तकोटिफलदं प्रात[११]र्नमस्कुर्महे ॥३५॥

मुक्तिप्रद-गायत्री-मन्त्र-विधानम् —

ओजोसीति सहोस्यहो बलमसि[१२] भ्राजोऽसि तेजस्विनी,
वर्चस्वी सवितागिनसोमममृतं रूपं परं धीमहि[१३]।
देवानां द्विजवर्यतां मुनिगणे मुक्त्यर्थिता-शातिता —
मोमित्येकमृचं पठन्ति यमिनो यं यं स्मरेत् प्राप्नुयात् ॥३६॥

मं०सं०—यहां 'ओजोसि सहोसि' इत्यादि मन्त्र के जप का विधान है जो कि मुक्ति-कामना का पूरक प्रयोग है।

---

१. प्रकाशनित्यं (ां) प्रियशास्त्रसर्वं, नित्यां (घ), २. भवन्ति।

३. सप्तत्रयीं, ४. शिखान्तामयीं। ५. मनुगतः। ६. ध्यायन्नित्यसमस्तवेदजननी गायत्रिसन्ध्यामयी ॥२६॥ सौषुम्नमार्गत्रयां, (ग) नित्यसमस्तदेवजननीं।

७. जीवेश्वरीं (घ) ८. परमां (घ) ९. सम्पुटार्ह०

१०. (ग) सन्ध्या द्वित्रिपदं जपेत् परतरे सायं तुरीयासह (घ) सन्ध्यादि-त्रिपदं० नित्यं नित्यमनन्त०। (ग—घ) ११. प्रातर्भजेन्नित्यशः।

१२. सहोसि वै बलमसि १३. धामसि। (ग. घ.) सह्रोस्यथो बलमसि।

ओमित्येकमजस्वरूपममलं तत्सप्तधा भाजितं,
तारं तत्र[1] समन्वितं परतरे पादत्रयं गर्भितम्।
आपो ज्योतिरसोऽमृतं जनमहः सत्यं तपः स्वर्भुव-
र्भूयोभूय नमामि भूर्भुव-स्वरोमित्येव तन्मन्त्रकम्[2] ।।३७।।

आदौ बिन्दुमनुस्मरन्[3] परतरं बालात्रिवर्णोच्चरन्,
व्याहृत्यादि-सबिन्दुयुक्तत्रिपदा-तारत्रयं तुर्यकम्[4]।
आरोहादवरोहतः क्रमगता श्रीकुण्डलीत्थं स्थिता[5],
देवीमानसपङ्कजे त्रिनयना पञ्चानना[6] पातु माम्।।३८।।

सर्वे सर्ववशे समस्तसमये सत्यात्मिके सात्त्विके,
सावित्रीसवितात्मिके शशियुते[7] साङ्ख्यायनीगोत्रजे[8]।
सन्ध्या त्रीण्युपकल्प्य सङ्ग्रहविधिः सन्ध्याभिधानात्मिके[9],
गायत्रीप्रणवादिमन्त्रगुरुणा सम्प्राप्य तस्मै नमः।।३७।।

क्षेमं दिव्यमनोरथाः परतरे चेतः समाधीयतां[10],
ज्ञानं नित्यवरेण्यमेतदमलं[11] देवस्य भर्गो धियम्[12]।
मोक्षश्रीविजयार्थिनोऽथ सवितुः श्रेष्ठं विधिस्तत्पदं[13],
प्रज्ञा मेऽथ प्रचोदयात् प्रतिदिनं यो नः पदं पातु माम्।।४०।।

सत्यं तत्सवितुर्वरेण्यविरलं विश्वादिमायात्मकं,
सर्वाद्यं प्रतिपादमुक्तरमया[14] तारं तथा मन्मथम्।
तुर्यान्यित्रितयं[15] द्वितीयमपरं संयोगसंव्याहृतिं,
सर्वाम्नायमनोमयीं मनसिजां ध्यायामि देवीं पराम्।।४१।।

आदौ गायत्रिमन्त्रं गुरुकृतनियमं धर्मकर्मानुकूलं,
सर्वाद्यं सारभूतं सकलमनुमयं देवतानामगम्यम्।

---

१. सत्र (ग घ) २. स्वरोमित्येव तन्मन्त्रकम् (घ), स्वरोमित्यन्त—(ग)।

३. बिन्दु-समुच्चरन्, ४. तुर्यगाम् (ग), ५. बिन्दु समुच्चरेत् (घ) ६. तुर्यगा (घ), ७. संस्थिता। ८. त्रिनयने पञ्चानने। (ग)।

९. शिवनुते (घ), १०. साङ्ख्यायने —(घ) (ग), ११. विधानात्मके। (ग)।

१२. दिव्यमनोरथं चैतत्समाधीमहि, (घ), १३. देवभजनं, देवस्य भर्गो धियः। १४. मोक्षार्थी (घ), १५. विजयार्थिनः सवितु स श्रेष्ठं,(ग-घ), विधीनां पदं, (ग) प्रज्ञामेव (ग)।

१६. पादयुक्तरमया (ग), २. तुर्यान्तं० (ग-घ)।

देवानां पूर्वदेवं[1] द्विजकुलमुनिभिः सिद्धविद्याधराद्यैः,
को वा वक्तुं समर्थस्तव मनुमहिमा बीजराजादिमूलम् ॥४२॥

गायत्रीं त्रिपदां त्रिबीजसहितां त्रिव्याहृतिं त्रैपदां[2],
त्रिब्रह्म त्रिगुणां त्रिकालनियमां वेदत्रयीं तां पराम्।
साङ्ख्यादित्रयरूपिणीं त्रिनयनां मातृत्रयीं[3] तत्परां,
त्रैलोक्यत्रिदशत्रिकोटिसहितां सन्ध्यां त्रयीं तां नुमः ॥४३॥

ओमित्येतत् त्रिमात्रं त्रिभुवनकरणं त्रिस्वरं वह्निरूपं[4],
त्रीणि त्रीणि त्रिपादं त्रिगुणगुणमयं[5] त्रैपुरान्तं त्रिसूक्तम्।
तत्त्वानां पूर्वशक्ति त्रितयगुरुपदं पीठयन्त्रत्रयाढ्यं[6],
तस्मादेतत् त्रिपादं त्रिपदमनुसरं त्राहि मां भो नमस्ते[7] ॥४४॥

स्वस्तिश्रद्धातिमेधा-मधुमतिमधुरः संशयः प्रज्ञकान्ति[8]—
र्विद्या[9] बुद्धिर्बलं श्रीरतनुधनपतिः सौम्यवाक्यानुवृत्तिः।
मेधा-प्रज्ञा-प्रतिष्ठा-मृदुपतिमधुरा[10]ऽऽपूर्णविद्याप्रपूर्णं,
प्राप्तं प्रत्यूषचिन्त्यं प्रणवपरवशात् प्राणिनां नित्यकर्म ॥४५॥

वर्णमालया जपविधानम्—

पञ्चाशद्वर्णमध्ये प्रणवपरयुते[11] मन्त्रमाद्यं नमोऽन्तं,[12]
सर्वं सव्यापसव्यं शतगुणमभितो वर्गमष्टोत्तरं ते।
एवं नित्यं प्रजप्तं त्रिभुवनसहितं तुर्यमन्त्रं[13] त्रिपादं,
ज्ञानं[14] विज्ञानगम्यं गगनसुसदृशं[15] ध्यायते यः स मुक्तः ॥४६॥

मं०सं०—अ वर्ण से ळ वर्ण तक ५० (लोम) तथा ळ से अ तक ५० (विलोम) तथा

---

१. पूर्वगम्यं, द्विजकुलमुनयः सिद्धविद्याधराद्याः, मनुमहिममहद्बीजराजाधिमूलम्। (ग, घ)।

२. त्रैपुरां (ग-घ)। ३. मात्रात्रयीं ओमित्येकं—त्रैपुरं तां (ग)

४. वह्निबीजं (घ), ५. गुणमयी (घ), ६. पीठत्रयं तान्त्रिकं (अनुरुच्च,) पीठयन्त्रत्रयाढ्यं, ७. ॐ नमस्ते।

८. शंसयं (घ), बलञ्चातुल० वार्तानुकर्त्री। प्रतिष्ठामृतमकरगिरा०(घ), नित्यकामा। (घ)। मधुरा-प्रज्ञा।

९. बलश्रीरतुल० नुवर्ती०, १०. मृदुमधुरगिरा—प्रपूर्णा। (ग)। प्राप्ता प्रत्यूषचिन्त्या प्रणवपरवशा प्राणिनां नित्यकामा।

११. मनुयुते०, १२. नमोऽन्ते०, १३. मन्त्र-त्रि० प्रजानां, (घ), सव्यापसव्ये, १४ वर्णाः, १५. गगनसमपदं।

क च ट त प य श आदि ८ वर्ग इस प्रकार १०८ वर्णों को माला के रूप में जोड़कर जप करने का विधान यहां सूचित है।

वर्णमाला-मन्त्राजप प्रयोगः फलञ्च —

आदिक्षान्तसबिन्दुयुक्तमुदितं मेरुं क्षकारात्मकं[1],
व्यस्ताव्यस्तसमस्तवर्गसहितं पूर्णं शताष्टोत्तरम्।
गायत्रीं जपतां त्रिकालसहितां नित्यं सनैमित्तिका-[2]
मेवं जाप्यफलं शिवेन कथितं सद्भोग[3]मोक्षप्रदम्॥४७॥

मं०सं०—पूर्वोक्त कथन को ही पुनः स्पष्ट किया गया है।

सप्तव्याहृतिसप्ततारविकृतिः सत्यं वरेण्यं धृतिः,
सर्वं तत्सवितुश्च धीमहि महाभर्गस्य देवं भजे[4]।
धाम्नो[5] धामदमादिधारणमहान् धीभत्पदं ध्यायते,
ॐ तत्सर्वमनुप्रपूर्णदशकं पादत्रयं केवलम्॥४८॥

विज्ञानं[6] विलसद्विवेकवचसः प्रज्ञानुसन्धारिणीं,
श्रद्धामेध्ययशः शिरः सुमनसः स्वस्ति श्रियं त्वां सदा।
आयुष्यं धनधान्यसम्पदतुलां देवी-कटाक्षं परं,
तत्काले सकलार्थ-साधनमदान्[7] मुक्तिर्महत्त्वं पदम्॥४९॥

सौम्यं सौभाग्यहेतुं सकलसुखकरं सर्वसौख्यं समस्तं,
सत्यं सद्भोगनित्यं सुखजनसुहृदं सुन्दरं श्रीसमस्तम्।
सौमङ्गल्यं[8] समग्रं सकलशुभकरं स्वस्तिवाचं[9] समस्तं,
सर्वाद्यं[10] सद्विवेकं त्रिपदपदयुगं प्राप्तुमाद्यं समस्तम्॥५०॥

गायत्री-पदपञ्च पञ्चप्रणवद्वन्द्वं त्रिधा सम्पुटं,
सृष्ट्यादि-क्रममन्यजापदशकं देवीत्रयं भूत्रयम्।
मन्त्राणां स्थितिभेदसम्पुटमिदं श्रीमातृकावेष्टनं,
वर्णान्तादिविलोममन्त्र-पठनं संहारसम्मोहनम्॥५१॥

---

१. मेरुक्षकारान्तकं० आदिक्षादि० मेरुक्षमारान्तकं। व्यस्तव्यस्तसमस्तपर्वसहितं पूर्णं०
२. नैमित्तिकं चैतज्जाप्यं नैमिज्जिके, एतज्याप्य०। ३. भोग।
४. धियः। (घ), ५. धीमदधीरधारणमहान् धीनिव्यकं (घ)।
६. विज्ञान० (ग); वचसा (घ), सन्धारणं, मेघ० शित्रः धानासम्पदतुलं। देवी—।
७. साधनकरे मुक्तेर्महत्त्वं। ८. सौमङ्गल्यं (घ)।
९. वाच्यं० १०. सद्वेद्य० ११. प्राप्तमध्यासमस्तम् (ग)।

भूराद्यं भूर्भूवः स्वस्त्रिपदपदयुतं[१] व्यक्षमाद्यन्तयोज्यं,
सृष्टिस्थित्यन्तकार्यक्रमशिखिसकलं[२] सर्वमन्त्रं प्रशस्तम्।
सर्वाङ्गं मातृकाणां मनुमयवपुषं मन्त्रयोगं प्रयुक्तं,
संहारं क्षादिवर्णं वसुशतगणनं मन्त्रराजं नमामि ॥५२॥

आधारादि-षडस्त्रतुर्यरसकं[३] दिक्सङ्ख्यया द्वादश,
तत्कण्ठोपरि षोडशं रविशशी संयोगमाज्ञाद्वयम्।
तत्पीयूषपथं त्रिनाडिसहितं षष्टयैकवर्णात्मकं,
सम्यग्ज्ञानसहस्रपत्र-सहितं तुर्यादिपादं भजे ॥५३॥

आद्यां च यां मनुमयीं जननीं स्मरन्ती-
त्येवं शिवस्य च वपुः प्रतिपालयन्ति।
सृष्टि-स्थिति-क्षयकरीं जगतां त्रयाणां,
शुद्धां गिरं विमृशथाम्यहमादिमातः ॥५४॥

प्राणापानसमानबिन्दुसहितं बन्धत्रयं संयुतं,
सप्तव्याहृति-बिन्दुसम्पुटपरं वेदादिपादत्रयम्।
गायत्रीं शिरसा त्रिनाडिसहितामीडे द्वये द्वे परे,
शुद्धे केवलकुम्भकं प्रतिदिनं ध्यायामि तत्त्वं पदम् ॥५५॥

अघोष-निर्घोष-गमागमस्थं, नाडीद्वयं रेचकपूरकं च।
कुम्भोपमं पूर्णघटप्रकारमेवं विधिः स्यात् प्रणवस्य साध्यः ॥५६॥

मानस-पूजा-सूचनम् —

पृथ्वी गन्धोऽर्च्चनायां[४] नभसि कुसुमता वायुधूपप्रकर्षो[५],
वह्निर्दीपप्रकाशो जलममृतमयं नित्यसङ्कल्पपूजा।
एतत्सर्वं निवेद्यं सुखवति हृदये[६] सर्वदा दम्पतीनां,
त्वं सर्वज्ञा शिवं मे कुरु तव ममता भक्तवर्गे प्रसिद्धा[७] ॥५७॥

---

१. प्रणवपद०। मन्त्रानत्र (मन्त्रात्म) शास्त्र। सर्वानां मातृकाणं। (घ) सर्वमन्त्रान्त-मस्त्रम्। २. शिखिशकलं (घ) भजामि ॥५२॥

३. आधारादिचक्रः-सहस्रकयुतं।

४. गन्धार्चनं वा (ग.) ५. धूपं तथैव गन्धानुलेपो (ख) ६. सुखवसतिहृदि। ७. तव मम जननी भक्तवृन्दे न ज्ञेया(ग)।

फलश्रुति-पुष्पिका —

[1]वैश्वामित्रमुदाहृतं हितकरं सवर्थिसिद्धिप्रदं,
स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।
वेदानां विधिवादमन्त्रसफलं[2] सिद्धिप्रदं सम्पदां[3],
सम्प्राप्नोत्यपरत्र सर्वसुखदं त्वायुष्यमारोग्यताम् ॥५८ ।

चतुःषष्टि-जपं सङ्ख्या-वेदशाखा-पुरःसरम् ।
स्वभेदं च विजानाति गायत्री सफला भवेत् ॥५९॥

मन्त्रसङ्ख्या — समाम्नाय-गुरुरूप-स्वभावकम् ।
नन्दनार्थं स्वयं वेत्ति गायत्री सफला भवेत् ॥६०॥

तान्त्रिकं योगिनीचक्रं हंसोच्चारगणान्वितम् ।
मृत्युलाङ्गूलसूक्तानि वेत्ति साक्षाद् हरिः स्वयम् ॥६१॥

नन्दशक्तिः पादुकाख्या गुरुदीक्षा तथैव च ।
देवीसूक्तं शृङ्खला च, गायत्री सफला भवेत् ॥६२॥

पञ्चाङ्गोपासनेनैव मन्त्रजाप्यं सुखं व्रजेत् ।
पञ्चयज्ञसमायुक्तं गायत्री सफला भवेत् ॥६३॥

बाह्य-विधान-सूचना —

दशधा मातृकान्यासं कलान्यासं ततः परम् ।
मूर्ति-मातृकया न्यासं प्रपञ्च-विजयं तथा ॥६४॥

पद-पादाक्षराबीजं षट्कुक्षिभिः समन्त्रकम्[4] ।
द्वादशलक्षणैर्युक्तं[5] गायत्री सफला भवेत् ॥६५॥

कराङ्ग-शोधनं शुद्धिर्वर्ण-न्यास-विधानतः ।
छन्दः षोडश यो वेत्ति सोऽपि ब्रह्माग्निविग्रहः ॥६६॥

---

१. विश्वामित्रसमुद्धृतं —

२. मन्त्रपरमं । ३. शाश्वतं, स प्राप्नोति परत्र सर्वसुखदं त्वायुष्यमारोग्यताम् ॥५८॥

४. षट्कुक्षी च समं त्रिकम् । (घ) ५. छन्दसो लक्षणैर्युक्तं० (घ) ।

शक्तिगन्धाष्टकं[१] प्राज्ञो लेखिनीं मण्डलक्रियाम्।
द्रव्याधारं पात्रशुद्धिं ज्ञात्वा भेदैः प्रमुच्यते[२] ॥६७॥

इति श्रीमद्-ब्रह्मतान्त्रिके विश्वामित्र-कृतः
डॉ० रुद्रदेवत्रिपाठि सङ्कलित-मन्त्रसङ्केतसमन्वितः
सम्पूर्णः ।

"श्रीगायत्री-स्तवराजः"

卐

कृष्णानन्द-कृपाप्राप्तो विद्यारण्येन बोधितः।
'रुद्रदेवः' ससङ्केतं स्तवराजमिदं बुधाः ॥१॥
यथामति सुसम्पाद्य गायत्री-चरणाब्जयोः।
समार्पयत् स सद्भक्त्या तेन माता प्रसीदतु ॥२॥

卐

१. शक्तिगन्धाष्टकं यथा —

चन्दनागरुकर्पूर-कुङ्कुमं रोचनं तथा।
शिलारसो जटामांसी हरिद्रा चैकवृद्धितः ॥

२. यह स्तवराज 'सर्वार्थसिद्धि-कल्प' हस्तलिखित ग्रन्थ में भी संगृहीत है। इसी ग्रन्थ में पैप्पलादशाखा के अनुसार 'षडघ्र्यप्रयोग' में उपयोगी अस्त्रों का विधान भी है। इसमें 'गायत्री परमाकला' कहकर कुछ ऋचाओं तथा वर्गों के प्रयोग भी दिखाये हैं।

गायत्री-मन्त्र-साधना-विमर्शः

—डा० रुद्रदेवत्रिपाठी

"उप त्वाऽग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ॥
(ऋ० १।१।७)

प्रस्तुताया ऋचः —'हे अग्ने ! मनुष्याणामग्रणीर्जगद्गुरो परमात्मन् ! अहरहः प्रतिदिनम् रात्रावहनि रात्रिन्दिवयोः सन्धौ सायम्प्रातः, मनसा त्वदेकचेतसा नमस्कारं सम्पादयन्तो वयं त्वत्पुत्राः सर्वे मनुष्यास्त्वामन्तरात्मानं भगवन्तं उपास्महे, गुरुमन्त्रेण गायत्र्योपासीमही"ति —भाष्यार्थ-माध्यमेन ज्ञायते यद् वेदाः सर्वप्रथमं गायत्र्याः = गायत्रीमन्त्रस्योपासन-साधनत्वं समकेतयन्निति। अथ च गायत्री 'वेदमाता'पदेनाथर्ववेदे किञ्चिद् विशिष्यैवं वर्णितास्ति —

स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम्।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसं,
मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ॥ (१९।७१।१)

अत्र स्वानुष्ठित-गायत्रीमन्त्रजपेन मन्त्रद्रष्टा ऋषिर्द्विजानामायुरादीष्टफलमाशास्य तन्मध्यवर्तिनः स्वस्यापि प्रार्थनीयं फलं सिद्धवदनुवदति। किञ्च —

तेजोऽसि शुक्रमस्यमृतमसि, धामनामासि।
प्रियं देवानामनाधृष्टं देवयजनमसि॥ (यजु० अ० १२, मं० ३१)

इति मन्त्रेण गायत्र्या आवाहनं विधीयते तथाऽस्या उपस्थानम् —

गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे।
नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मा प्रापत्॥[1]

इति मन्त्रेण क्रियते। इयमेव च गायत्री कालभेदेन त्रिधा व्यवाह्रियत। यथा —

गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने।
सरस्वती च सायाह्ने सैव सन्ध्या त्रिधा स्मृता॥

१- अयं वाजसनेयकशतपथब्राह्मणोक्तो गायत्र्युपस्थानमन्त्रः। बृ० ५।१४।७।

क्रियाभेदेनाऽप्यस्य त्रैविध्यं - तत्प्रयोक्तृप्राणत्राणाद् **गायत्री** सवितृद्योतनाज्जगतः प्रसवितृत्वाच्च सैव सावित्री वाक्स्वरूपत्वाच्च **सरस्वती**ति ।

एवं रूपेण विभावितेयं 'गायत्री' किं छन्दोरूपैव ? किं वा मन्त्ररूपा ? किं वा गायत्री-मन्त्रोक्ता सवितृरूपा ? प्रत्युत शक्तिरूपेति प्रश्नाः प्रायशः साधकानां मनसि समुत्पद्यन्ते । तत्राहि —

'किमिदं छन्दः ?' इति प्रश्ने छन्दः किल त्रिविधं भवति १. लक्ष्यापेक्षम् २. लक्षण्यापेक्षं तथा ३. लक्षणापेक्षम् । यथा-" १. अग्निमीडे०, २. गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्याद्याः सप्तैव जातयः, ३. यदक्षरं परिमाणं तच्छन्दः, मात्रान्तरसङ्ख्या नियता वाक् छन्द इति च स्पष्टम् । तत्रापि छन्दसामुच्चावचवादा अनेके सन्ति । यथा—"प्राणमात्रा छन्दः । वाचिकप्राणः स्वरस्तन्मात्रा वाचिकच्छन्दः । भौतिकप्राणो वैश्वानरस्तन्मात्रा भौतिकच्छन्दः । वागेव छन्दः शब्दवाच्या न । अतोऽवच्छेदश्छन्द इत्येव राद्धान्तः, स च मानेन प्रतिष्ठया वा तुलितकेन वा क्रियमाणो वस्तुस्वरूपमर्यादाबन्धः । अत एवाच्छादकस्य छन्दस्त्वम् । इतरसम्बन्धापवारकत्वमाच्छादकत्वम् । 'तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे' इति स्वरूप-संवरकत्वमेव छन्द इत्यपि । अथवा — मा-प्रमा-प्रतिमात्मकभेदत्रयभिन्नः प्राणावच्छेदोऽवच्छिन्नप्राण एव वा छन्दः । प्राणश्छन्दःपरिभाषायामक्षरशब्देनाख्यायते तेषां चाक्षरप्राणानां प्रातिस्विकोऽवच्छेदो मात्राशब्देन वाचिकच्छन्द आर्थिकच्छन्द इति ज्ञायते ।

अनया दृष्ट्या गायत्रीच्छन्दो वाचिकार्थिकच्छन्दसोरग्निरूपत्वं मन्यते । अष्टावग्निरूपाणि । अत एव-'**अग्निर्गायत्र**' इत्युच्यते । अष्टाक्षरा गायत्री । तस्मादाहुर्गायत्रोऽग्निरिति । तेजो ब्रह्मवर्चसं गायत्रम् । ब्रह्म गायत्रम् । ब्राह्मणो गायत्रः । '**गायतो मुखादपतद्**' इति **गायत्री**, **सा** च त्रिपदा । गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभति'-इत्यनुष्टुभश्च निर्वचनम् ।

गायत्रीछन्दस्त्विदं '**दैव्येकाक्षरा गायत्री**' (उपनिदानसूत्रे) प्रणवस्य च्छन्दोद्योतिका । अष्टाक्षरात्मकत्रिपदा सती चतुर्विंशत्यक्षरा प्रसिद्धा । कैश्चिच्च **मा** ४ **प्रमा** ८ **प्रतिमा** १२, **उपमा** १६ **समा** २० चेति पञ्चापि गायत्रीति निगद्यन्ते । यजुषां गायत्री षडक्षरा । ऋचां त्रिःषट् । साम्नां द्वादशाक्षरा । आर्ची अष्टादशाक्षरा । ब्राह्मी षट्त्रिंशदक्षरा (उव्वटभाष्ये) इत्थमेव 'वर्धमाना गायत्री पिपीलिकामध्या गायत्री' चेत्यादयो भेदाश्छन्दःशास्त्रादिषु प्रदर्शिताः सन्ति ।

एवं छन्दःसु बहुषु सत्स्वपि गायत्रीच्छन्दस एवं मुख्यत्वं प्रतिपादयन्ती भगवती श्रुतिः —

गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग् वै गायत्री ।
वाग् वा इदं सर्वं भूतं गायन्ति त्रायते च ।। (छान्दोग्ये० ३।१२।१) इति ।

भगवत्पादाः श्रीशङ्कराचार्याश्चास्याः श्रुतेर्भाष्ये गायत्र्या महत्त्वं प्रतिपादयन्तश्चेत्थं व्याख्यातवन्तः —

"गायत्रीद्वारेण चोच्यते ब्रह्म । ब्रह्मणः सर्वविशेषरहितस्य नेतिनेतीत्यादि विशेषप्रतिषेधगम्यस्य दुर्बोधत्वात् । सत्स्वनेकेषु छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात् ।

सोमाहरणादितरच्छन्दोऽक्षराहरणेनेतरच्छन्दोव्याप्त्या च सर्वसवनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः। गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं ततोऽन्यद् गुरुतरं न प्रतिपद्यते, यथोक्तं — ब्रह्मापीति। तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात्। अतो गायत्रीमुखेनैव ब्रह्मोच्यत इति।"

बृहदारण्यकश्रुते (५।१४।१) भाष्येऽपि तं इत्थं निगदन्ति —

"गायत्र्युपाधिविशिष्टस्य (ब्रह्मणः) उपासनं वक्तव्यं···**सर्वच्छन्दसां हि गायत्रीछन्दः प्रधानभूतम्···ः द्विजोत्तमस्य द्वितीयं जन्म गायत्रीनिमित्तं तस्मात् प्रधाना गायत्री**···**गायत्र्या हि यः सृष्टो द्विजोत्तमो निरङ्कुश एवोत्तमपुरुषार्थसाधनेऽधिक्रियते। अतस्तन्मूलः पुरुषार्थ-सम्बन्धः।"**

किञ्च '**बृहदारण्यकोपनिषद्भाष्ये**'ऽपि प्रतिपादितवन्त आचार्याः —

"**सैषा गायत्री प्राणः। अतो गायत्र्यां जगत्प्रतिष्ठितम्। यस्मिन् प्राणे सर्वे देवा एकं भवन्ति। सर्वे वेदाः कर्माणि तत्फलं च, सैव गायत्री प्राणरूपा सती जगत आत्मा, सा हैष गयाँस्तत्रे=त्रातवती, के पुनर्गयाः? प्राणाः=वागादयो वै गयाः। गयत्राणाद् गायत्रीति प्रथिता"। इति। (५।१४।४)**

एवमेवान्यत्र गायत्र्या व्याख्यानानि सुबहूनि प्राप्यन्ते, तानि विस्तरभियाऽत्र न प्रकाश्यन्ते परं योगशास्त्रेण प्रतिपादितानां नाडीनामपि गायत्रीमन्त्राक्षरैर्महान् सम्बन्धोऽस्तीति विषये किमप्यत्र प्रतिपाद्यते।

आगमिको गायत्री-विमर्शः

आगमेषु गायत्री-मन्त्रस्य विमर्शो द्विधा प्राप्यते। तत्र प्रथमे विमर्शे स्वतन्त्ररूपेण '**गायत्री**'-**तन्त्र**'मिति नाम्ना प्रणीतं तन्त्रं श्रीमच्छङ्कराचार्यचरणैर्व्याख्यातं तथा '**गायत्री-भाष्य**'-नाम्ना बहवो ग्रन्था उपलभ्यन्ते, येषु **शङ्कराचार्य-सायणाचार्य-भास्कर-भट्ट-महीधर-वल्लभाचार्य-विट्ठलनाथ-महाप्रभुरूपगोस्वामि**-प्रभृतीनामाचार्याणां गायत्री-मन्त्रार्थपूर्वकं स्व-स्वसम्प्रदायानुसारिण्यो जपप्रक्रिया वर्णिताः सन्ति। पुराणेषु दर्शिता जपपद्धतयोऽपि तन्त्राण्ये-वानुकुर्वन्ति। नानाविधेषु पटलेषु गायत्रीमन्त्रमधिकृत्य जपादिव्यवस्थाः प्रकटिताः सन्ति। यथा हि—'**तारैकजटापूजा-पटल**'स्यान्ते 'गायत्री-रहस्य'-प्रकरणे गायत्रीमन्त्रविषये प्रोक्त-मस्ति —

गायत्र्या पुटितं मन्त्रमिष्टमन्त्रं जपेच्छतम्।
इष्टमन्त्रेण पुटितां गायत्रीं प्रजपेच्छतम्॥१॥

एतज्जपं महेशानि ! आधाराधेयमुच्यते।
विनाधारं महेशानि ! आधेयं न विना तथा॥२॥

आधारः सिद्धयते भद्रे ! आधेयं च न सिद्धयति।
सर्वेषु विष्णुमन्त्रेषु शैवशाक्तेषु सुन्दरि॥३॥

सौरे गाणपतौ भद्रे शस्यते वरवर्णिनि ।
एवमाधाराधेयं च यः करोति द्विजातिकः ॥४॥
अङ्कुरो जायते भद्रे लक्षजापान्न संशयः ।
न स जीवात्मनोर्भिन्नो गायत्री ब्रह्मरूपिणी ॥५॥
गायत्र्या नहि भिन्नः स्याज्जीवात्मा तत्स्वरूपिणी ।
सर्वदैवोभयोरैक्यं नारिकेले यथोदकम ॥६॥
चन्द्रसूर्योपरागे च जप्त्वा ब्रह्ममयो भवेत् ।
मन्त्रस्य परमेशानि न च होमादिकं दशा ॥७॥
कृते होमादिके भद्रे तज्जप्ते विफले तथा ।
जपमात्रे महेशानि दशांशं केन जायते ॥८॥
गायत्र्या रहितो यस्तु जपपूजादिका वृथा ।
हविरारोपमात्रेण यथा वह्निः प्रदीप्यते ॥९॥
आधाराधेय-सम्बन्धान्मन्त्रः प्रज्वलितस्तथा ।
विनाधाराधेयं च प्रजपेद् यदि मूढधीः ॥१०॥
शतकोटि-जपेनापि तस्य विद्या न सिद्धचति । इति ।

श्रीविश्वामित्र-प्रोक्ते **'गायत्री-स्तवराजे'** गायत्रीमन्त्रस्य सम्पुट-विदर्भ-बीज-योजन-मन्त्रान्तरगर्भानुलोम-विलोम-नानाविध-प्रणवादि-विद्यामन्त्रसंयोजनप्रकाराणां ये ये निर्देशा विद्यन्ते ते सर्वेऽप्यागमप्रोक्ता एव । कालविशेषेण जप्यानां गायत्रीमन्त्राणां प्रक्रियास्तत्तद्-विद्यायुक्त-मन्त्राणां प्रयोगाश्चागमेष्वेव लभ्यन्ते । **'मन्त्रमहार्णव-पुरश्चर्यार्णव-श्रीविद्यार्णव-मन्त्रमहोदधि'**-प्रभृति-तन्त्रग्रन्थेष्वपि गायत्रीमन्त्रस्य विशिष्टाश्चर्चास्तथा चान्यान्यानि 'गायत्री-विधानानि' प्रदर्शितानि विद्यन्ते । एवमेव पञ्चतारागायत्री-साम्राज्यबीजयुक्ता-सव्यापसव्य-गायत्री-सदृशा अनेके मन्त्रा अपि तत्तत्प्रयोगसमन्वितास्तन्त्रेषु विद्यन्ते ।

अत्र तन्त्र-योगयोः समष्ट्या या गायत्री-मन्त्र-साधना क्रियते तद्विषये परमपूज्याद्य-शङ्कराचार्य-प्रदर्शितायाः पद्धत्याः संक्षेपः प्रस्तूयते सोऽप्यागम-सम्मत एवेति ।

'यतिदण्डैश्वर्ये' गायत्री-निरूपणम्

आद्यशङ्कराचार्यचरणानामुपलब्धेषु ग्रन्थेषु **'यतिदण्डैश्वर्यविधानं'** नाम ग्रन्थरत्नमद्या-वध्यज्ञातमेवावर्तत । पूज्यपादाः श्रीविद्यारण्य (मूर्खारण्यापरनामधेयाः) यतयो नेपालदेशादिमं ग्रन्थं समुद्धृत्यानीतवन्तः । नैकैरध्यायैः समन्वितो बृहदाकारकोऽयं ग्रन्थः श्रीमदाचार्यै-र्ज्योतिर्मठे प्रारब्धः कारणवशाच्च नेपालान् समागत्य तत्रैव निवसद्भिरयं समापितः ।

१- अयं ग्रन्थः साम्प्रतं मुद्रितः । अस्य सम्पादनं हिन्दीव्याख्यानं चास्य निबन्धस्य लेखकेन (मया रुद्रदेवेन) विहितमस्तीति ।

अस्मिन् यतेर्दण्डस्य वैज्ञानिकेन विवेचनेन सह शारीर-शास्त्रस्य तथा साधनासम्बद्धानां रहस्यानामपि विस्तरेण विचारो विहितः। अस्मिन् ग्रन्थे श्रीचक्रार्चना-प्रसङ्गेनावरणार्चनान्याविर्भावयद्भिस्तैरेकादशद्वादशावरणयोर्गायत्रीसाधनाया एकं दुर्लभं विधानमपि निरूपितमस्ति । तत्र हि —

गायत्रीमन्त्रस्य वर्णानधिकृत्य या देवता वर्णितास्तासां सङ्ख्या चतुर्विंशतिसङ्ख्यात्मिका नास्ति प्रत्युत द्वात्रिंशन्मयी विद्यते । कारणं तत्र **'नेत्रतन्त्रो'**क्तोऽयं पद्यांशो विद्यते —

"अक्षराक्षर-संयुक्तो यः स मन्त्रो नैव सिद्धयति ।"

एतदनुसारं संयुक्ताक्षरवतो मन्त्रस्य जपात् सिद्धिर्न भवतीति निश्चित्यैवाचार्यपादैर्गायत्रीवर्णानां गणना एकत्रिंशदक्षरैर्विहिताऽस्ति । सहैव गायत्रीवर्णानधिकृत्य ते शरीरस्थानां नाडीनामप्यनुसन्धानं चक्रुः । प्रत्येकं नाड्या नाम्नि देवीशक्तेर्नाम निविष्टं विद्यते। मानवशरीरे वर्तमाना नाड्यस्तासामेव शक्तीनां नामभिः स्थिताः सन्ति। आचार्यपादा गायत्रीमन्त्रवर्णाधारेण वर्णितानां तासां देवीनां नाम्नां पाठमात्रेण गायत्रीमन्त्रजप-फलं भवतीति दर्शितवन्तः । किञ्चैतैः साकं तुरीयपादस्य[1] नववर्णानां शक्तयोऽपि दर्शिताः । एवमाहृत्य चत्वारिंशन्नाम्नां जपादौ जपान्ते च पाठाच्छरीरस्थं नाडीतन्त्रं प्रदीप्तं सत् साधकस्य लक्ष्यसाधने सहायकं भवति ।

मानवशरीररचना गायत्री च

गायत्र्या वर्णात्मक-स्वरूपाधारेणैव मानव-शरीरस्य रचना संवृत्ताऽस्ति । शरीरस्थो मेरुदण्डो गायत्र्या अक्षरात्मकं तन्त्रं विद्यते । यथा गायत्रीमन्त्रे चतुर्विंशतिसङ्ख्यकान्यक्षराणि विद्यन्ते तथैव मेरुदण्डेऽपि तावत्य एव कशेरुकाः सन्ति। तासां कशेरुकाणां रचना गायत्र्या एकैकेन वर्णेन वर्णानुरूपेण वा सम्पन्नाऽस्ति। एतासु प्राणशक्तीनां प्रवाहानुरूपमेव वर्णानां मुखानि विभिन्नानक्षांशान् प्रति वलितानि विद्यन्ते । अक्षराकृतौ परिणमयितुं तानि वर्णमुखानि तावत एवाक्षांशान् यावद् वलयितव्यानि भवन्ति । सरलीभावात् तानि तेषां तेषामक्षराणां स्वरूपेषु परिणमन्ते। मस्तिष्के चलन्त्यो नाड्यो मेरुदण्डमेवाधारीकृत्य पादाङ्गुष्ठं यावदात्मीयानि कार्याणि सम्पादयन्ति। मेरुदण्ड एव समेषां चक्राणां सर्वेषां नाडीचक्राणां शक्तिकेन्द्राणाञ्च वर्तत आवासः। गायत्र्याः शरीररचनायाश्च सम्बन्ध इयान् घनिष्ठो विद्यते यो हि शब्दानां माध्यमेन प्रकटयितुं न भवत्यलम् । निरन्तरं साधनायाः प्रवृत्त्या यदा रहस्यानां प्रकटीभावस्याधारभूः पुष्टा भवितुं प्रवर्तते तदा तेषां रहस्यानामनुभवाः स्वयमेव प्रारभ्यन्ते शनैः शनैश्च गायत्र्याः साधकस्य च स्थितिरेकाकारा भवितुं प्रवर्तते। शरीरस्य मन्त्रमय्यां स्थितौ सत्यां शरीरं दिव्यत्वं धारयति दिव्यत्वस्थितौ च विश्वस्य विश्वस्य किमपीदृशं रहस्यं नावशिष्यते यन्न प्रकटीभवेत्। ब्रह्माण्डस्य पिण्डस्य च तादात्म्यं तदैव स्थाप्यते। ईदृशाय शरीराय नावशिष्यते किमपि दुर्लभम् ।

१- अयं पादोऽथर्ववेदादुद्धृतः **'परो रजसे सावदोम्'** इति विद्यते ।

गायत्री शरीरस्थं नाडीचक्रञ्च

मानवशरीरस्य स्थूला सूक्ष्मा चोभयविधा सञ्चालन-प्रक्रिया नाडीसंस्थानेनैव भवति। शरीरमाधारीकृत्य नाडीसमूहोऽयं पिण्डरूपेणात्मन एकं पृथग् ब्रह्माण्डं संस्थाप्य राजते। पिण्डस्यायं ब्रह्माण्डः प्राणशक्तेराधारेणैव विराजा ब्रह्माण्डेनात्मनः सम्बन्धं स्थापयित्वा स्थितः। मानवशरीरस्य समस्ते पिण्डे सार्धत्रिलक्षमितानां नाडीनामस्त्यधिष्ठानम्। तास्वपि द्वासप्ततिसहस्रमिता नाड्यो मुख्याः सन्ति। या अन्याभिः सहयोगिनीभिर्नाडिकाभिः सम्बद्ध्यन्ते। तास्वपि द्वासप्ततिसङ्ख्यकाः प्रमुखा या हि मानवशरीरस्य समस्तानां क्रिया-कलापानां मुख्याधाररूपाः।

इत्थं शरीरस्येमासु द्वासप्ततिनाडिकासु नियन्त्रण-संस्थापनस्य तात्पर्यमस्ति सृष्टेः कस्मिन्नपि कार्ये स्वेच्छाशक्त्या परिवर्तनसामर्थ्यप्राप्तिः। इदं नियन्त्रणं तदैव भवितुमर्हति यदा—अशुद्धस्य रक्तस्य शोधनं शुद्धस्य रक्तस्य शरीरे प्रसारणं प्राणवायुना प्राणतत्त्वस्य ग्रहणं प्राणस्य पञ्च प्राणेषु तथा पञ्चोपप्राणेषु विभाजनं विचारेच्छा-क्रिया-चिन्तन-मननानि च भवेयुः। अस्तीदं सर्वं प्राणस्वरूपाया गायत्र्या अधीनम्।

मानव-मस्तिष्कं वाम-दक्षिणयोर्द्वयोर्गोलार्धयोर्विभक्तं विद्यते। प्रत्येकं गोलार्धे षोडश-षोडश नाड्यः सन्ति या आरोहावरोहक्रमेण द्वात्रिंशद्-द्वात्रिंशद् रूपा भवन्ति। द्वयोरपि गोलार्ध-योरिमा नाड्यः शरीरेऽधोभागं प्रति गच्छन्त्यो यत्र यावतां दलानां रूपेण चक्राणि निर्मान्ति तत्र तावत्य एव न्यूना भवन्ति किञ्च दिशां कोणा भवन्ति तत्र दलानामनुपातेन तावत्य एव नाडिकास्तासु सम्मिलिता जायन्ते। इत्थं द्वयोरपि भागयोर्नाडिका अग्रे ललनाचक्रं सम्प्राप्य सर्वप्रथमं चतुः-षष्टिदलात्मकं चक्रं निर्मान्ति। ललनाचक्राच्चाग्रे वर्धमानास्ता एव विशुद्ध-चक्रे षोडशदलात्मकं पद्मं रचयन्ति। तत्र तासां सङ्ख्यायां षोडशनाडीनां नैयून्यमायाति। ततोऽग्रे वायव्यकोणरूपाच्चक्राच्चतुर्दश नाडिका उपेत्य युञ्जन्ति। ततः परमनाहतपद्मे द्वादश नाडिका न्यूना भवन्ति नैर्ऋत्यकोणादेकादशनाड्य आगत्य मिलन्ति। मणिपूरकनिर्माणे दश नाडिका न्यूना भवन्ति तदाऽऽग्नेयकोणादागत्याष्टौ नाड्यो भूयोपि सङ्गताः। ततः परं स्वाधिष्ठानचक्रनिर्मितये षण्णाडिका न्यूना भवन्ति तदैशानकोणचक्रादुपेत्यैकादशनाड्यः पुनः संयुताः जायन्ते। एवमेत्र मूलाधारचक्रस्य निर्माणे यत्र चतस्रो नाड्यो न्यूनतां यान्ति तदा-ऽऽज्ञाचक्रनिर्माणे द्वे नाड्यौ न्यूने भवतः। अग्रे मूलाधारादप्यधो विषुवचक्रस्याष्टौ नाड्यस्तथा-ऽकुलचक्रस्य षण्णाड्यः पुनः सङ्गच्छन्ति, एवं सर्वाः सम्भूय द्वासप्ततिसङ्ख्यकाः सम्पद्यन्ते।[1] क्रममिमं परिज्ञातुं तालिका-फलकमिदं द्रष्टव्यम् —

१- अन्यत्र कथितमस्ति यत् कन्दमूलादेव सर्वा इमा नाड्य उत्पद्यन्ते -

गुदस्तु द्व्यङ्गुलादूर्ध्वं मेढ्रात् तु द्व्यङ्गुलादधः।
चतुरङ्गुलविस्तारं कन्दमूलं खगाण्डवत्॥
नाड्यस्तस्मात् समुत्पन्नाः सहस्राणां द्विसप्ततिः। इति॥

मस्तिष्कात् प्रारभमाणानां नाडीनां सञ्चारक्रमः

चक्रनामानि	दलानां सङ्ख्या	चक्रेषु नाडीनां प्रभावः	नाडीनां योगः
ललनाचक्रेषु	६४	पूर्णा सङ्ख्या	६४
विशुद्धचक्रे (उत्तरे)	१६	न्यूना जाताः	४८
वायव्यकोणे	१४	संयुताः	६२
अनाहतचक्रे (पश्चिमे)	१२	न्यूना जाताः	५०
नैर्ऋत्यकोणे	११	संयुताः	६१
मणिपूरचक्रे (दक्षिणे)	१०	न्यूना जाताः	५१
आग्नेयकोणे	८	संयुताः	५९
स्वाधिष्ठानचक्रे (पूर्वे)	६	न्यूना जाताः	५३
ईशानकोणे	११	संयुताः	६४
मूलाधारचक्रे	४	न्यूना जाताः	६०
आज्ञाचक्रे	२	न्यूना जाताः	५८
विषुवचक्रे	८	संयुताः	६६
अकुलचक्रे	६	संयुताः	७२

एता द्वासप्तति-नाडिका एवाग्रे परःसहस्राणां नाडिकानां स्वरूपेण विकसन्ति ।

मस्तिष्कस्य वाम-दक्षिणभागाभ्यां निःसृत्य सञ्चरणशीला एता नाडिका द्वात्रिंशद्-द्वात्रिंशद् रूपेणैकस्य प्रवाहस्य रूपं सम्प्राप्याग्रे वर्धन्ते । ललनाचक्रं यावद् गत्वा वामा नाड्यो वामपक्षाद् दक्षिणा नाड्यश्च दक्षिणपक्षादावर्तं रचयन्त्यश्चतुःषष्टिदलात्मकस्य पद्मस्य 'ललना-चक्र'स्य निर्माणं कुर्वन्ति । पद्मनिर्माणोत्तरं द्वयोरपि पक्षयोर्नाड्यः परस्परं युञ्जन्ति । एवं पद्माय पूर्णत्वप्रदानानन्तरं यत्र पूर्वोक्ता नाड्यो युज्यन्ते तत एवैकैका नाडी भिन्नभिन्नरूपेणोत्पन्ना सती चतुःषष्टिनाडीनां रूपेणाग्रे वर्धन्ते । अग्रे विशुद्धचक्रमागत्य यत्र षोडशदलानां पद्मं भवति तत इमा अष्टौ वामपक्षतोऽष्टौ च दक्षिणपक्षतः पद्मं निर्माय समाप्नुवन्ति । पुनर्विशुद्धा-नाहतचक्रयोर्मध्ये निर्मितिमादधानं वायव्यपद्मं निर्मातुमध ऊर्ध्वचक्राभ्यां विशुद्धादधो यान्त्योऽष्टौ तथाऽनाहतादूर्ध्वं यान्त्यः षट् प्रचलिष्यन्ति यतो मध्ये चतुर्दशदलानामधोमुखं वायव्यचक्रं सम्पत्स्यते । अधोमुखचक्रनिर्माणानन्तरं चतुर्दश नाड्यः पुनः प्रवाहे मिलित्वा तावतीनामेव नाडीनां वृद्धिं कुर्वन्ति ।

इत्थमुपरि दर्शिते फलके न्यूनता-संयुतिमतीनां नाडिकानामयमेव क्रमोऽस्ति यो हि परस्तादन्तं तावत् प्रचलन् तिष्ठति ।

मस्तिष्काच्चलन्तीनामेतासां नाडीनां सञ्चालनक्षेत्रं मेरुदण्डमाध्यमेन हस्तपादाङ्गुष्ठानि यावद् विद्यते । तासु कियत्यश्चिदेतादृश्योऽपि नाड्यः सन्ति याः सहजतया प्रकृतिधर्म-रूपेण स्वीयानि शारीरिककार्याणि साधयन्ति । अनेका ईदृश्योऽपि नाड्यो विद्यन्ते या अति-सूक्ष्माः सन्ति । तादृश्य एव सूक्ष्मा नाड्यः शक्तीनां स्रोतांसि वर्तन्ते या हि मानवशरीरे

सुप्तास्तिष्ठन्ति। तासु यदि प्राणप्रवाहः प्रवेष्टुं शक्येत तर्हि ता विकासं प्राप्नुवन्ति सति च विकासे स्वासु सुप्ताः शक्तीरुद्बोध्याद्भुतान्यलौकिकक्षमतावन्ति कार्याणि सम्पादयितुं चेष्टन्ते। तासु **सूक्ष्मनाडिकासु प्राणानां प्रवाहप्रवेशनस्यैकमात्रं साधनं गायत्र्युपासनमेव वर्तते।** साधनां कुर्वतः साधकस्य प्राणशक्तौ यथा यथा नियन्त्रणं भवितुं प्रारभ्यते, तदनुरूपमेव ता नाड्योऽपि प्राणशक्तिं प्राप्य चैतन्या भवितुं प्रारभन्ते। साधनाकाले तस्याभासः स्पष्टं भवति। नाडीषु नियन्त्रणप्राप्त्यनन्तरं कस्मा अपि कार्यायाभीष्टा नाडी चैतन्या कर्तुं शक्यते तथा तया कार्यं सम्पादयितुं शक्यते। कार्यसम्पादनानन्तरं नाडी स्वस्यां शान्तमुद्रायां तिष्ठति। नाडीचैतन्ये नियन्त्रणाप्राप्तेः परं नाड्यो वशवर्तिन्यो भवन्ति, एकवारं चैतन्यं लब्ध्वा पुनः सुप्ता अपि न भवन्ति किन्तु कार्यपूर्त्यनन्तरं शान्तिमवलम्बन्ते। ता नाड्य इयत्यः सूक्ष्माः सन्ति यद् द्विसहस्रगुणितस्थूलदर्शनसामर्थ्यशालिसूक्ष्मदर्शकं यन्त्रमपि केवलं क्षीणक्षीणकेशतन्तुवदेव स्वरूपं दर्शयति। इयतीषु सूक्ष्मासु नाडीष्वपि भूयस्योऽन्या नाड्यो भवन्ति। मानवस्य सम्पूर्णमपि शरीरं लतायास्तन्तुजालकसदृशेन नाडी-वितानेनाच्छादितं विद्यते। एका प्राण-शक्तिरेव नाडीतन्त्रस्याधारभूताऽस्ति।[1]

गायत्रीजपस्य शरीरे प्रभावः

इदं पुरा प्रतिपादितमस्ति यद् गायत्री-साधनाया लक्ष्यं विराजि स्थितायाः प्राण-शक्तेराकर्षणं विधाय पिण्डे स्थितया प्राणशक्त्या संयोजनं वर्तते। पृथ्व्याः प्राणस्रोतः सूर्योऽस्ति। अनन्तानां रश्मीनां रूपे सूर्येण प्राणशक्तिर्निरन्तरं प्रवाहिता भवति। अन्न-जल-वाय्व-ग्न्यौषधीनां माध्यमेन मानवशरीरस्य पोषणं सूर्यस्य प्राणशक्तिरेव विदधाति। सामान्यतः समस्तं दृश्यं जगद् नैसर्गिकेषु नियमेषु निबद्धं सत् तस्या एव प्राणशक्तेरुपभोगं विधत्ते। मानवशरीरमपि तेष्वेव नियमेषु स्वस्य नैसर्गिकस्य प्राणस्योपभोगं करोति। अस्यां समस्तायां सृष्टौ मानव एवैकमात्रमीदृशो विद्यते यो यदि कामयेत तदा स्वीयात् प्रयत्नाद् यां प्राणशक्तिं स प्राप्तवानस्ति ततोऽप्यधिकां प्राणशक्तिमर्जयितुं शक्नोति। प्राणशक्तिरेव सर्वासां शक्तीनां मूल आधारः।

